CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम्

प्रथमवर्षे प्रथमोऽङ्कः २०४५ माघः

संरक्षकः—
वाल्मीकि विद्यापीठस्य प्राचार्यः

प्रधानसम्पादकः—
सुमनः कट्टेलः

परामर्शदाता—
प्रा. श्रीऋषिरामः पोखरेलः

सम्पादकाः—
आमोदवर्धनः कौण्डिन्न्यायनः
तुलसीरामः शर्मा
जीवनः अधिकारी

सहयोगी—
दिव्यचन्द्र आचार्यः

प्रकाशकः
वाल्मीकि विद्यापीठस्य छात्रसङ्घः

मूल्यम् २/—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

किम् ?	कस्य ?	कुत्र ?
१. महेन्द्र–संस्कृत–वि.वि...	आमोदवर्धनः कौण्डिन्न्यायनः	१
२. स्वागतम्	नवराजः कट्टेलः	६
३. चक्षुरिन्द्रियम्	दिव्यचन्द्र आचार्यः	११
४. अकार्यम्, अकार्यम्	सुमनः कट्टेलः	१३
५. प्रेरकरोचकप्रसङ्गः	ध्रुवः भट्टराई	१६
६. वैदिकविद्याधर्मरक्षायां...	प्रियव्रतवदाम्बा कौण्डिन्न्यायनी	२०
७. शुल्वसूत्रे उल्लिखितं...	ज्ञानमणिः नेपालः	२४
८. ज्ञातव्यः विषयः	जनार्दनः घिमिरे	२६
९. छात्रसङ्घकार्यकलापः		२८
१०. सम्पादकीयम्		३०

अनुरोधः

लेखकमहोदयाः अस्यां पत्रिकायां प्रकाशनाय सरलसंस्कृतभाषायां लिखितान्, रोचकान् साहित्यिकान्, अनुसन्धानात्मकान्, आधुनिकान् च लेखान् प्रेषयन्तु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महेन्द्र-संस्कृत-विश्वविद्यालयस्य शैक्षिककार्यक्रमस्य पर्यालोचनम्

— आमोदवर्धनः कौण्डिन्न्यायनः

त्रिभुवन–विश्वविद्यालयान्तर्गते संस्कृत–सङ्काये महेन्द्र-संस्कृत-विश्वविद्यालयतया परिणते सति अस्माद् विश्वविद्यालयात् संस्कृत–शिक्षाप्रेमिभिः बहूनि वस्तूनि अपेक्षितानि अभूवन् । विश्वविद्यालयस्य आगमनेन संस्कृत–शिक्षायाः विकास–विस्तार–सुदृढीकरणानां कृते बहूनि कार्याणि भवेयुः, विश्वविद्यालयस्य शैक्षिक-कार्यक्रमो व्यावहारिकतरः व्यापकः आकर्षकश्च भवेत्, विद्यापीठानां सङ्ख्या अपि यथासम्भवं वर्धिता स्यात्, अत्यल्पसङ्ख्यतया स्थितानां संस्कृत–माध्यमिकविद्यालयानां सङ्ख्यां वर्धयितुमपि ध्यानं गच्छेत्, संस्कृत–शिक्षायाः छात्रस्रोतः वर्धयितुं संस्कृत–शिक्षायां छात्राणां प्रवृत्तिं वर्धयितुं च विश्वविद्यालयात् समुचित–कार्यक्रमस्य सञ्चालनं भवेत्, अनेन प्रकारेण संस्कृत–विश्वविद्यालयः संस्कृत–शिक्षायाः समृद्ध्यर्थं महद् योगदानं कुर्यादिति संस्कृत–शिक्षा–प्रेमिभिः आकाङ्क्षितमभूत् । एषा आकाङ्क्षा नेपाल–संस्कृत–परिषदा २०४४।११।२२ तिथौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आयोजिते संस्कृत-शिक्षा-प्रेमि-सम्मेलने संस्कृतप्रेमिणामभिव्यक्तिषु सम्यग् मुखरिता जाता अभूत् । विश्वविद्यालयस्य क्षेत्रं नाम्ना एव स्वभावत एव च विशालं भवत्येव । यदि क्षेत्रं सङ्कुचितमेव, विकास-विस्तारयोः अवसरस्य अभाव एव तर्हि संस्कृतोच्च-शिक्षालयस्य महाविद्यालयत्वेनैव सञ्चालनमुचिततरं भवति, न तु दम्भमात्रफलक-विश्वविद्यालयत्वेन । अतः संस्कृत-शिक्षायाः क्षेत्रमपि विशालं भवितुमर्हतीति आकाङ्क्षा उचिता एव अभूत् । किन्तु विश्वविद्यालयेन अद्यावधि कोऽपि विशिष्टो नवीनः संस्कृत-शिक्षा-प्रेमिजनाकाङ्क्षानुकूलः शैक्षिक-कार्यक्रमो जनसमक्षे प्रस्तुतो नास्ति; विकास-विस्तारयोस्तु वार्ताऽपि न श्रूयते ।

अधुना विश्वविद्यालयेन स्वकीयो नवीनः पाठ्यक्रमो निर्मितः प्रयोक्तुमारब्धश्चास्ति । अस्य पाठ्यक्रमस्य अध्ययनेन ज्ञायते यद् विश्वविद्यालयेन संस्कृत-शिक्षायाः क्षेत्रं यथापूर्वं सङ्कुचितमेव स्थापितमस्तीति । अस्मिन् पाठ्यक्रमे संस्कृतवाङ्मये स्थितानां त्रयी-दण्डनीति-वार्ता-ऽऽन्वीक्षिकीणां चतसृणां विद्यानां मध्ये त्रय्यान्वीक्षिकी-सम्बद्धानामेव विषयाणां समावेशः कृतोऽस्ति । अत एव एष पाठ्यक्रमः संस्कृत-वाङ्मयस्य विविधानां विधानां सम्यक्तया प्रतिनिधित्वं कर्तुमपर्याप्त एव दृश्यते । दण्डनीतिविद्याया वार्ताविद्यायाश्च संस्कृत-विश्वविद्यालय-पाठ्यक्रमे असमावेशात् संस्कृतशिक्षायां सर्वसाधारण-जनानां रुचेरनुकूलानां संस्कृत-शास्त्रीय-विषयाणामभावो यथापूर्वमेव वर्तमानोऽस्ति । अत एव च संस्कृतशिक्षायां छात्राणां वास्तविक्यां प्रवृत्तौ ह्रास एव आगच्छन्नस्ति । तस्माद् ब्राह्मणभिन्नानां सर्वेषां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनानां कृते महिलानां कृते च अत्यन्तमुपयोगि रुचिकरं च नीति-शास्त्रमेको विषयः पृथग्विषयत्वेन कवर्गीयेषु विषयेषु म. सं. वि. वि.-पाठ्यक्रमे अचिरादेव वर्धनीयो दृश्यते । अधुना उत्तरमध्यमकक्षायां कवर्गे एकः त्रयीक्षेत्रान्तर्गततया ग्रहीतुं शक्यो धर्मदर्शनप्रधान एव तन्त्रविषयो वर्धितोऽस्ति । एतेन तु संस्कृत-शिक्षा-विधा-विविधीकरणं नैव जातम् । खवर्गीयेषु विषयेषु तु कोऽपि विस्तारः कृतो नास्ति । अत्र हिन्दी-मैथिलीसदृशाः विषयाः समाविष्टाः सन्ति । किन्तु इतिहास-संस्कृति-भूगोल-गणितादीनां विषयाणां पाठ्यक्रमे समावेशः कृतो नास्ति । अनेन ज्ञायते यद् विश्वविद्यालस्य शैक्षिक-कार्यक्रमस्य विस्तारे स्वल्पमपि ध्यानं गतं नास्तीति । महेन्द्र-संस्कृत-विश्वविद्यालयेन एकवारं वाराणसीस्थ-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य पाठ्यक्रमस्य अवलोकनं कृत्वा केन प्रकारेण विषयाणां समायोजनं कर्तव्यम्, के के विषयाः समावेश्या इति ततः समुचिता शिक्षा गृह्यते चेत् समीचीनमेव भवेदिति मन्ये ।

संस्कृत-विश्वविद्यालयस्य शैक्षिक-कार्यक्रमे न केवलं विकास-विस्तारयोरभाव एव दृश्यते, अपि तु स्तरानुरूपतया विषयाणां समायोजनस्याप्यभावोऽ दृश्यते । शास्त्रिकक्षापर्यन्तं शास्त्रीयताया गुरुं भारं विनैव यथा छात्राः संस्कृतवाङ्मयस्य विविधपक्षाणां परिचयम्, धर्मसंस्कृत्योर् विषये प्रामाणिकं सामान्यं ज्ञानम्, कार्यक्षेत्रे साक्षात् प्रयोज्यं लौकिक-व्यावहारिक-विषयज्ञानं च पुष्कलतया प्राप्नुवन्ति, तथैव विषय-समायोजनं कर्तव्यम्, अधुना तु पाठ्यक्रमे शास्त्रीयविषयस्य भारो गुरुकः, संस्कृतस्नातकैः अवश्यं प्राप्तव्यस्य संस्कृतवाङ्मय-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधविधानां परिचयस्य अत्यन्तमेव न्यूनता च दृश्यते । विश्वविद्यालयेन शास्त्रिकक्षाया द्वितीयखण्डे एव एकस्मिन्नेव अनिवार्यसंस्कृतपत्रे गद्य–पद्यकाव्य–दर्शनाऽऽचारशास्त्र–संस्कृतवाङ्मयपरिचय–निबन्धादीनां बहूनां विषयाणां समावेशं कृत्वा उपर्युक्तलक्ष्यस्य येन केन प्रकारेण निर्वाहं कर्तुं चेष्टा कृता प्रतीयते । किन्तु अङ्कभार–पाठभारयोः असन्तुलनेन तत् पत्रं व्यावहारिकरूपेण उक्तं लक्ष्यं प्राप्तुमकिञ्चित्करं दृश्यते । उत्तरमध्यमायां शास्त्रिकक्षायां चाऽनिवार्यसंस्कृतपत्रे भास–कालिदास–भवभूतिप्रभृतीनामेकतमस्याऽपि कवेः एकस्याऽपि नाटकस्य असमावेशः पाठ्क्रमस्य असङ्गतिं स्फुटीकरोति । एतत्पाठ्यक्रमानुसारं विश्वप्रथितयशसां संस्कृतनाटकानामेकतमेनाऽपि नाटकेन साक्षादपरिचितो जनोऽपि संस्कृत–विश्वविद्यालयस्य स्नातको भवितुं शक्नोतीति पाठ्यक्रमस्य असमीचीनत्वं स्पष्टतया बोद्धुं शक्यते । नवीने पाठ्यक्रमे शास्त्रिकक्षायां खवर्गीयेषु विषयेषु कवर्गीयाः शास्त्रीया विषया अपि समाविष्टाः सन्ति । कवर्गीयाणां विषयाणां द्वयोः खण्डयोः चत्वारि पत्राणि सन्ति । किन्तु खवर्गीयाणां विषयाणां द्वयोः खण्डयोः त्रीणि एव पत्राणि विद्यन्ते । अनेन कारणेन द्वयोः विषययोः समानः पाठ्यभारो नैव भवति । अतः खवर्गीयेषु विषयेषु कमपि शास्त्रायं विषयं गृहीतवान् छात्रस्तस्मिन् विषये आचार्यकक्षायां कथं प्रविष्टो भवितुं शक्नुयात् ? न शक्नोति चेत् तद्ग्रहणस्य किं प्रयोजनम् ? यदि कश्चन छात्रः खवर्गीये विषये कमपि आधुनिकं विषयं गृहीत्वा शास्त्रिपरीक्षामुतीर्णो भवति तर्हि स तु त्रिभुवन–विश्वविद्यालयान्तर्गत–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानविकीसङ्कायस्य स्नातकोत्तरकक्षायां प्रवेष्टुं शक्नोति । अतः खवर्गीयशास्त्रीय–विषयाणां व्यावहारिकता एतत्पाठ्यक्रमे न दृश्यते। यदि त्रि. वि. वि.– मानविकी-सङ्कायस्य स्नातकस्तरे द्वयोः विषययोः इव कवर्गीय–विषयस्य खवर्गीयविषयस्य च उभयोः खण्डयोस्त्रीणि पत्राणि एव अभविष्यन् तदा कवर्गीय–खवर्गीयविषययोः समानः पाठ्यभारः अभविष्यत्, एकतरस्मिन् विषये आचार्यकक्षायां प्रवेशः समभविष्यत्, द्वयोः विषययोः एव शास्त्रिस्तरीया सर्वविधा मान्यता च अभविष्यत्, एवं च खवर्गीय–शास्त्रीयविषया व्यावहारिकतायामागमिष्यन् । एतादृश्यां व्यवस्थायां जातायामनिवार्य–संस्कृतवाङ्मयस्य अध्ययनाय एकस्य शतस्य अङ्कानां लाभोऽपि भवितुमशक्ष्यत् ।

एतावता विवरणेन संस्कृत–विश्वविद्यालयस्य शैक्षिककार्यक्रमस्य मेरुदण्डायमाने पाठ्यक्रमे विषयाणां पाठ्यभाराणां च समायोजने सुसङ्गतेः अभावः स्पष्टो भवति । एतावदेव न, विश्वविद्यालयस्य शैक्षिक–कार्यक्रमे विकास–विस्तारयोः अभावाद् विवेकशैथिल्याच् च तत्–तद्विषयपाठ्यक्रमे बहुविधास्त्रुटयोऽपि जाताः सन्ति । तासां सर्वासां त्रुटीनामुल्लेखोऽत्र न सम्भवति, उदाहरणार्थं कासाञ्चन एव त्रुटीनामुल्लेखोऽत्र क्रियते। उत्तरमध्यमकक्षायामनिवार्यसंस्कृतस्य अङ्कभारे वर्धिते सत्यपि विषयवस्तुनः समायोजने स्वल्पाऽपि सङ्गतिः नैव दृश्यते । द्वयोः पत्रयोः विभक्तयोः, १५० अङ्कान् गृहीतवतोः अनिवार्यसंस्कृतपत्रयोः केवलमनुवादाऽनुच्छेदलेखनाभ्यासादिः साधारणो विषयः समाविष्टोऽस्ति । अपि च अनिवार्यसंस्कृतव्याकरण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्रस्यैवाऽध्ययनेन गतार्थप्राया रूपसिद्धिप्रक्रिया–विग्रहप्रदर्शन–प्रकृति-प्रत्ययविश्लेषणादिविषया अपि अनयोः पत्रयोः समाविष्टा दृश्यन्ते। 'बोधः' इत्यस्य तु एकस्यैव विषयस्य उक्तयोः द्वयोरेव पत्रयोः समावेशः कृतो दृश्यते। किन्तु गद्य–पद्यकाव्य–नाटकादीनामंशतोऽपि तयोः पत्रयोः स्थानं नास्ति। तथैव वेद–शास्त्रकक्षायां षष्टेः अङ्गानां सिद्धान्तकौमुदीस्वरवैदिकप्रकरणयोः स्थाने तदपेक्षया दशमांशमात्रयोः मध्यकौमुदीस्वरवैदिकप्रकरणयोः पञ्चाशदङ्गभारकत्वेन निर्धारणं कृतं दृश्यते। एतादृशोऽसन्तुलितोऽपरिष्कृतः पाठ्यक्रमः कथं प्राज्ञिक-परिषदि स्थितैः 'प्राज्ञिक'–महाशयैः स्वीकृतः? पाठ्यक्रमे एतादृश्यः त्रुटयो बहुत्र प्राप्यन्ते। यथा—उत्तरमध्यमकक्षायामनिवार्यनेपाली-विषये उपन्यासविधापरिचयाय अत्यावश्यकम् 'वसाइँ' इत्याख्यम् उपन्यासं निष्कास्य 'गौरी' इत्याख्यस्य काव्यस्य समावेशः; शुक्ल-यजुर्वेदविषये "प्रचलिताश्चूडोपनयनविवाहपद्धतयः" इत्यनेन प्रकारेण, तत्त्वविषये द्वितीयपत्रे पञ्चमपाठ्यग्रन्थतया "अभिलेखाः वंशावल्यः इतिहासश्च" इत्यनेन च प्रकारेण अनिश्चितत्वेन अपरिमितत्वेन वा निर्देशः; खवर्गीयनेपालीविषयस्य पत्रे स्थितानामैच्छिपकाठ्यांशानां निष्कासनम्; कवर्गीये साहित्यविषये शास्त्रिकक्षायामाचार्यकक्षायां च अभिनेयार्थकाव्यस्वरूपाङ्गप्रत्यङ्गादिनिरूपणपरस्य एकस्याऽपि ग्रन्थस्य असमावेशः, शास्त्रिकक्षायां कवर्गीये साहित्ये पठनीयस्य साहित्यदर्पणस्याऽपि षष्ठपरिच्छेदस्य परित्यागः; अस्यामेव कक्षायां खवर्गीये नेपालीविषये प्रथमपत्रे 'घ'–प्रकरणे 'ऋतु–विचार' 'आगो र पानी' 'पापिनी आमा' इत्याख्यानां त्रयाणां खण्डकाव्यानां पाठ्यविषयत्वेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्देशं कृत्वा तत्प्रकरणस्य पाठ्यग्रन्थानां निर्धारणे प्रकरणनिर्दिष्टयोः 'ऋतुविचार' 'आगो र पानी' इत्यनयोः असमावेशः, प्रकरणे अनिर्दिष्टस्य 'कुञ्जिनी' इत्यस्य खण्डकाव्यस्य च समावेशः; तत्तत्क्षेत्रे प्रसिद्धानां ग्रन्थानां परित्यागं कृत्वा अप्रसिद्धानाम्, अमुद्रितानां वा ग्रन्थानां पाठ्यग्रन्थत्वेन निर्धारणम् (यथा– शास्त्रिकक्षायां धर्मशास्त्रविषयस्य प्रथमपत्रे मनुस्मृतेः 'राधाकृष्णाश्रमीटीका', आचार्यस्य अष्टमपत्रस्य शोधपद्धतौ 'अनुसन्धानप्रकाशः' इत्यादि); आचार्यस्य अष्टमपत्रे एकरूपताया अभावः (यथा– अन्येषु सर्वेषु विषयेषु शोधपद्धतेः समावेशः, किन्तु शाङ्करवेदान्तविषये तस्याः अभावः); पाठ्यग्रन्थत्वेन सहायकग्रन्थत्वेन वा निर्धारितानां ग्रन्थानामत्यावश्यकस्थलेऽपि लेखकस्य प्रकाशकस्य च बहुषु स्थानेषु अनुल्लेखः; अग्रन्थस्य ग्रन्थत्वेन उल्लेखः (यथा– वेदशास्त्रिप्रथमपत्रे तृतीयपाठ्यग्रन्थत्वेन शुक्केष्टेः उल्लेखः); "वेदप्रामाण्यादिपूर्वको वेदाङ्गविचारः" (वेदाचार्याष्टमपत्रखप्रकरणे) "वेदशाखासमयवेदस्यापौरुषेयत्वादिकञ्च" (शुक्लयजुर्वेदाचार्यैकादशपत्रकप्रकरणे) इत्यादिरूपेण असमीचीनाया अशुद्धायाश्च भाषायाः प्रयोगः; अकौशलेन असावधानतया च पाठ्यग्रन्थनिर्देशः (यथा– उत्तरमध्यमायां तन्त्रविषये तृतीयपत्रे प्रथमपाठ्यग्रन्थतया तृतीयपाठ्यग्रन्थतया च द्वयोः द्वयोः ग्रन्थयोः निर्देशः, एकादशपाठ्यग्रन्थतया पञ्चदशपाठ्यग्रन्थतया च तस्यैव लेखकस्य-एकस्यैव ग्रन्थस्य निर्देशः) चेति।

विश्वविद्यालयस्य शैक्षिककार्यक्रमस्य मेरुदण्डायमाने पाठ्यक्रमे वर्तमाना एतादृश्यस्त्रुटयः पाठ्यक्रमनिर्माणार्थं निर्देशं कुर्वतामधि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारिणाम्, त्रुटियुक्तपाठ्यक्रमस्य निर्मातृणाम्, एतादृशं पाठ्यक्रम-मन्तिमरूपेण स्वीकुर्वतां 'प्राज्ञिक'–महाशयानां च अयोग्यतां संस्कृत-शिक्षाया उन्नतौ औदासीन्यमत्यावश्यकजागरूकतायाः सर्वथा अभावं वा स्पष्टतया प्रकटयन्ति ।

एतादृशप्रकारेण महेन्द्र-संस्कृत–विश्वविद्यालयस्य शैक्षिक-कार्यक्रमोऽतीव असन्तुलितः, अव्यावहारिकः, अनाकर्षकः, वृत्ति राष्ट्रे समाजे च समादरणीयतां प्रतिष्ठां च कामयमानानां युवकानां युवतीनां च प्रवृत्तये अत्यन्तमेव अननुकूलश् च दृश्यते । संस्कृतविश्व-विद्यालयस्य शैक्षिककार्यक्रमस्य मेरुदण्डरूपे पाठ्यक्रमे वर्तमाना एतास्त्रुटयः संस्कृतविश्वविद्यालयात् संस्कृतशिक्षाया उन्नतौ बहु आशासानानां संस्कृतप्रेमिणां चित्तमवश्यमेव दुनुयुः । एतद्विषये राष्ट्रिय–शिक्षा–समित्या, शिक्षामन्त्रिणा, अन्यैः सम्बद्धैः उपरितनैः महानुभावैः अपि अवश्यं ध्यानं देयम् । तेषां ध्यानस्याऽऽकर्षणाय अस्मिन् विषये संस्कृत–शिक्षा–प्रेमिभिः अपि सदा जागरूकैः भाव्यम् ।

तत्रैहलौकिकसुखार्थिषु दण्डनीतिर्
वार्तेति शास्त्रयुगलं गुरुणोपदेश्यम् ।
यः पारलौकिकमभीप्सति शर्म धर्मं
तस्यां प्रबोधयति तं कृपया महेशः ।।

– महामहोपाध्यायः गङ्गाधरशास्त्री
(अलिविलासिसंलापे ४/८७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(२०४१ तमे वैक्रमाब्दे समायोजिते
स्वागतकार्यक्रमे पठिता कविता । सं.)

स्वागतम्

—नवराजः कट्टेलः

विद्यापीठे पठितुमनसः संहता भो सखायः !
सुस्निग्धानां मुदितमनसा स्वागतंवः प्रकुर्मः ।
विद्या—ज्योति स्वहृदयतले द्योतयित्वा सुदीप्रं
संघेभूत्वा विकशितपथं राष्ट्रमेतन्नयामः ॥१॥

धैर्यं धृत्वा विमलमनसा संस्कृतं सद् विदित्वा - संस्कृतिं
धीरा वीरा निपुणमतयः सच्चरित्रा भवेम ।
छात्रस्कन्धे भवति भुवने जन्मभूत्थानभार
स्तस्माद्देतोः प्रविशत बुधा ! छात्रसंघे सुरम्ये ॥२॥

माता भ्राता जनक—इतरे बान्धवा अस्मदीया
स्वैर्दैरेतत् प्रमुदितहृदा धारयन्ते स्वतन्त्रम् ।
दुःखे तीव्रेऽप्यचलमनसा स्वच्छ—विद्यामधीत्य
भूत्वाऽचाल्या विकशितधियस्तद्हृदं प्रीणयाम ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्याऽभ्यासो भवतु सततं ह्यात्मकल्याणहेतोः
विद्याऽभ्यासो भवतु सततं देशकल्याणहेतोः ।
विद्याऽभ्यासो भवतु सततं विश्वकल्याणहेतोः
विद्याऽभावे भवति भुवने ह्यन्धकारस्य राज्यम् ।।४।।

ज्ञात्वा सम्यग् विविधविषयान् तीव्रया मेधयेह
लोकान् सार्वान् विशद–विषये शिक्षयित्वां स्वकीये ।
सिद्धान्ते स्वेऽतिशयसुदृढा लोकरक्षां विधत्त
संभाव्येत्थं पुनरपिधिया स्वागतं स्वागतं वः ।। (दीयते)

सोमोऽस्माकं ब्राह्मणानां राजा ।

– शुक्लयजुर्वेदवाजसनेयिसंहिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चक्षुरिन्द्रियम्

– दिव्यचन्द्रः आचार्यः

इन्द्रियेषु चक्षुः सर्वश्रेष्ठमिन्द्रियमत्यन्तमहत्त्वपूर्णञ्च । चक्षुषः साहाय्येन सर्वाणि कार्याणि सम्पादयितुं शक्यते । स्वल्पाकारमपि मानवीयं चक्षुः सुदूरस्थं नक्षत्रादिकं पश्यति, सुसूक्ष्माणि धूल्यादि चूर्णानि च । यद्यपि वस्तूनि निमेषकाल एव दृश्यते, अनुभूयते च । वस्तुतो विषयादीनां दर्शने नेत्रादीनामनेकाः प्रक्रिया निष्पद्यन्ते । तत एव वस्तुज्ञानं सम्भवति ।

यदा नेत्रस्य दृष्टिः पदार्थे जायते तदा पदार्थस्य प्रकाशकिरणानि ताल (LENS) मतिक्रम्य नेत्रे प्रविश्य, अन्तः पटले (RETINA) संकेन्द्रीभवन्ति । एवं संकेन्द्रीभूतानि किरणानि वैद्युते सन्देशे (ELECTRICAL SIGNALS) परिवर्त्यन्ते ततस्ते सन्देशाः शरीरस्य प्रमुखयन्त्रम्, मस्तिष्कं प्राप्नुवन्ति । मस्तिष्कञ्च तान् सन्देशान् दृष्टिमूलके काल्पनिकरूपे निश्चिताकारे परिवर्तयति । अनेन प्रकारेण वस्तु दृश्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशं विना वस्तूनां दर्शनादि प्रक्रिया असम्भवाः। चक्षुषा वस्तु नैव दृश्यते।चक्षुर्हि प्रकाश–किरणानि पश्यति। ततो नेत्रे किरणानि प्रविशन्ति। अतः सुप्रकाशे, अल्पप्रकाशे च वस्तूनां दर्शनं सम्भवति। अन्धकारे तु प्रकाशकिरणानामभावान्न तच्छम्भवति। अन्तः पटल (RETINA) स्य एका विशेषता वर्तते। तद् दृश्यमानानां पदार्थानां निवृत्तावपि तेषां प्रतिविम्बं १/८ सेकेण्डाख्यकालपर्यन्तं स्वस्मिन् स्थापयति। अतश्चलचित्र सदृशानां परिवर्तितानां पदार्थानां क्रियायाः स्मरणेनान्योन्यसम्बन्धज्ञाने सौकर्यं जायते।

रक्तपुष्पस्य रङ्गो रक्त एव दृश्यते, नान्यः। अत्रास्ति गूढं रहस्यम्। रक्तपुष्पाणां रक्तत्वं तस्य गुणो न प्रकाशस्यैव। किन्तु रक्तपुष्पस्य रक्तत्वं ध्रुवं तत्रानुस्यूतमस्तीत्युच्यते चेत् तन्न। यतः प्रकाशरहिते अन्धकारे न तस्य रक्तत्वं दृश्यते। अतस्तस्य रङ्गो रक्त इति वक्तुं न शक्यते।

चक्षुः खलु प्रकाश–किरणमेव गृह्णाति केवलम् इति तु पूर्वमेव प्रोक्तः। प्रकाशे सप्तरङ्गा भवन्ति। ते च रक्तः, ईशल्लोहितः, पीतः, हरितः, नीरः, नीलः, वैजन्याख्यश्च। यदा प्रकाशकिरणानि रक्तपुष्पे पतन्ति तदा तत् पुष्पं रक्तं किरणं प्रकटयति। अन्यानि किरणानि स्वस्मिन्नेवान्तर्भावयति। रक्तेतराणां रङ्गाणां परिवर्तनमसम्भवम्। केवलम्, प्रकाशस्य रक्तो रङ्गो नेत्रतः अन्तः प्रविशति। अतो रक्त-पुष्पस्य रङ्गो रक्त एव भवतीति मन्यन्ते वैज्ञानिकाः। □

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अकार्यम्, अकार्यम् ।

– सुमनः कट्टेलः

अद्य मम मनसि अनेकविचारधाराः उच्छलन्त्यः सन्ति । ह्यः मया यत्कृतं तन्न समीचीनम् । अहं मम प्रकोष्ठादपि बहिर्गन्तुं न शक्नोमि । जनाः माम् निन्दन्ति । मया किं कृतम् ? विनाशकाले विपरीतबुद्धिरिति सत्यमेवोक्तम् । इतः पूर्वं मम जीवनं सौम्यं, शान्तिमयं सुखमयञ्च आसीत् । परमद्य...। क्षणिक प्रलोभनेन किम् सञ्जातम् ? मम बान्धवा मित्राणि च किं विचारयन्ति ? तेषां पुरतः कथमहं रूपमीदृशं दर्शयिष्यामीत्येव चिन्ता मे मानसं क्लिश्नाति । मानवाः कस्मात् कारणात् परिश्रमं कुर्वन्ति ? परमहन्तु धनोन्मादेन इत अपि अत्यधिको धनिको भवितुं असदमार्गे प्रवृत्तम् । मत्कृते इदं शयनमपि दुःखकरम् । ..... न शयितव्यम् । मञ्च एव उपविशामि । दूरभाषणयन्त्रं कुतः कः ध्वनयति ? वार्ता करणीया । किं प्रहरिकार्यालयादागतः अस्ति ? सम्भवतः ते ज्ञातुमिच्छन्ति अहमत्रास्मि न वा ? मम शरीरं तु कम्पमानं विद्यते । स्वेदः अपि उत्पद्यत् वर्तते । अहो ! किमिदम् वैचित्यम् ?.....। अहं न भीतः । मया न किमपि कृतम् । किं मम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आननं परिवर्तितं दृश्यते ? दर्पणं पश्यामि । आ ! किमपि परिवर्तनं नास्ति । वार्तां करोमि.....। कुतः ? कः ? किम् ?

आम् ।

... ...।

क ?... ...।

अहमेवास्मि

... ... ।

का वार्ता विद्यते ?

... ...।

किमपि नास्ति ?

... ... ।

आम्, अस्तु ।

व्यर्थमेव मया शङ्का कृता । सः तु मम मित्रमस्ति । एतस्मिन् कार्ये बहवो जनाः सफलतां प्राप्नुवन्ति । अहमेव कथं न शक्नोमि ? यदि अस्मिन् कार्ये साफल्यं भवति तदा अहमेतादृशं कार्यं नैव करिष्यामि । अहन्तु भयभीतः । प्रहरिणः आगच्छन्तः सन्ति किं वा ! गवाक्षं उद्घाटयित्वा द्रष्टव्यम् । न कोऽपि दृश्यते । धनिको भूत्वापि एतादृश–जीवनयापने तु अतीव कष्टमनुभूयते । द्रव्यसञ्चयं कृत्वा एव किं भवति ? यदि तावत् एतादृशी दुरवस्था कष्टम् अशान्तिश्च भवति । मम मनः स्थिरं भवितुं नैव शक्नोति । अनुचितकार्यकरणे इत्थं मानसिकं कष्टं भवतीति मया न कदापि विचारितम् । एकं मित्रं कारागरे नीतमस्ति । अहमपि किञ्चित् सयथानन्तरं...।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृशं न विचारणीयम् । परमेश्वरं विना मां न कोऽपि सहायतां कर्तुं शक्नुवन्ति । भो भगवन् ? मां क्षम । एतदनन्तरमहं किमपि दुष्कार्यं न करोमि ।

कः ? आगच्छ । सेवक ! का वार्ता ?

... ...।

प्रहरिण आगच्छन्तः सन्ति ?

... ... मया किं कर्तव्यम् ?

प्रच्छन्नं भवामि । परं प्रहरिणः गृहं परितः संस्थिताः । हा हन्त ! अहं लुण्ठितः । पापस्य फलं दुःखदमेव भवति । मम पार्श्वे द्रव्यमपि आसीत् । परमहं धनस्यात्यधिकप्रलोभनेन स्म्याकादिप्रतिबन्धितवस्तूनां व्यापारे संलग्नो जातः । सत्यमेवोक्तं—लोभात्सञ्जायते कामः... ... बुद्धिनाशात् प्रणश्यति । प्रहरिणः अत्र एव आगच्छन्तः सन्ति । मया किं करणीयम् ? अत्रैव तिष्ठामि । असदमार्गस्यावलम्बने यद् भवति तदेव भवतु ।

× × × × ×

जानामि धर्मं न च मे प्रवृत्तिर्
जानाम्यधर्मं न च मे निवृत्तिः ।
केनाऽपि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ।।

— वाल्मीकिरामायणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेरक-रोचकप्रसङ्गाः

सङ्कलकः– ध्रुवः भट्टराई

१. महात्मागान्धी महोदयो यत्र गच्छति स्म तत्रैव सर्वे पत्रकारा एकीभूय विविधानां विषयाणां प्रश्नान् पृच्छन्ति स्म। एकदा एकस्मिन् पत्रकारसम्मेलने एकः पत्रकारस्तं प्रश्नमेकमपृच्छत्– "भवान् सदैव स्वर्गनरकयोर्विषये मतानि प्रकटयति; मृत्यूपरान्तं भवान् कुत्र गमिष्यति। स्वर्गे नरके वा भवतः कुत्र विश्वासः?" इति। तच्छ्रुत्वा गान्धीमहोदय एवमुत्तरमवादीत् "अहं मृत्यूपरान्तं स्वर्गं नरकं वा कुत्र गमिष्यामीति नास्ति चिन्तायाः विषयः, परन्तु अहमस्मिन् विषये निश्चितोऽस्मि यत् त्वत्सदृशाः पत्रकारा मां तत्रापि न कदापि त्यक्षन्ति" इति।

२. वेलायतदेशस्य भूतपूर्वः प्रधानमन्त्री विलियम–ग्ल्याडस्टोन महोदयोऽत्यन्तमेव सरल आसीत्। एकस्मिन् दिने केनापि जनेन स पृष्टः– "भवान् तु अधुना अस्माकं देशस्य प्रधानमन्त्रिपदमलङ्करोति, तदपि कीदृशी सरलता इयम् भवतः। ईदृशी सरलता नोचिता प्रधानमन्त्रिसदृशानां जनानाम्। भवतः पुत्रस्तु सुन्दराणि वस्त्राणि परिधत्ते; मिष्ठान्नञ्च सदैव भुङ्क्ते, परिश्रमञ्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF-Delhi

न करोति, आधुनिकताप्रियश्च सः। इत्थं कथं सम्भवति ?" इति। ततो ग्ल्याडस्टोन इत्थमकथयत्– "स तु प्रधानमन्त्रिणः पुत्रोऽस्ति। तस्मात् किं न भवति तादृशः। अहं तु एकस्य कृषकस्यैव पुत्रोऽस्मि। कृषकसदृशानां जनानां पुत्रस्तादृशो भवति किं ?" इति।

३. अल्बर्ट आइन्स्टाइनः प्रथमे वयसि अध्ययनेऽत्यन्तमेव मन्दबुद्धिरासीत्। यौवनेऽपि विस्मरणशील आसीत् सः। एकदा स धुम्रवाहिनीयन्त्र मेकमधिरुह्य कुत्रापि गच्छन् आसीत्। तस्मिन्नेवावसरे यात्रिपत्रपरीक्षक (टिकट-चेकर) एकस्तस्यैव समीपमागत्य तमपृच्छत्– "भवतः कुत्र वर्तते यात्रिपत्रम् (टिकट), शीघ्रमेव मां दर्शय" इति। आइन्स्टाइनस्य असावधानतया तत् पत्रं पूर्वमेव कुत्रापि पतितमासीत्। तस्मात् स तं परीक्षकं तत् पत्रं दर्शयितुं नाशक्नोत्। परीक्षकोऽपि विश्वस्तो भूत्वा प्रकोष्ठमन्यं प्राविशत्। तथापि आइन्स्टाइनस्य मनसि नासीत् कापि शान्तिः। स इतस्ततः पश्यन् पुनः पुनः चञ्चलतां चाऽदर्शयत्। पूर्वागतः परीक्षकः पुनस्तत्रागत्य आइन्स्टाइनमपृच्छत्– "भवतु तावत् शान्तः, कथमधुनापि चिन्ताग्रस्तोऽस्ति भवान्" इति। परीक्षकस्य वचनं श्रुत्वा आइन्स्टाइनमहोदयो नीचैः स्वरेण इत्थमबादीत्– "तस्य पत्रस्य विषये नास्म्यहं चिन्ताकुलः, परन्तु अहं यन्त्रादस्मात् कस्मिन् स्थाने अवतरिष्यामीत्यपि तत्रैव लिखितमासीत्" इति।

४. अमेरिकादेशस्य महान् वैज्ञानिकः थोमस एल्भा एडिसनः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकार्ये सदैव निमग्नो भवति स्म। बहिर्जगति किमभवत्, किं भवति, किञ्च भविष्यतीति विषये तस्य मनसि नासीत् किमपि स्थानमेकम्। विज्ञानविषय एव तस्य एकाग्रता। एकदा स स्वस्यैव प्रयोगशालां गत्वा स्वकार्ये दत्तचित्तोऽभूत्। महानसे तस्य पत्नी पतिमधुना आह्वयामि चेत् तस्य कार्ये विघ्नं भविष्यतीति विचार्य एकाकिनी एव भोजनं कृत्वा तस्य भागमेकञ्च तस्मै विभज्य बहिर्गतवती। यदा स प्रयोगशालायां स्थित्वा स्वकार्यं कुर्वन्नासीत् तदैव पूर्वमेव बहिर्गतः 'कोऽपि भृत्यो महानसं भोजनाय अगच्छत्। भोजनं सर्वं परिसमाप्य रिक्तानि भाण्डानि च तत्रैव परित्यज्य स च पुनरपि बहिरेवागच्छत्। निरन्तरकार्येण व्याकुलतां गतः एडिसनश्च भोजनं करोमीति विचार्य प्रयोगशालाया महानसमगच्छत्। तत्रासन् रिक्तानि भाण्डान्येव। तानि दृष्ट्वा 'मया भोजनं तु पूर्वमेव कृतं भवेत्। कथं मूर्खोऽस्म्यहं द्विवारमत्र आगच्छामि भोजनाय' इति निश्चित्य पुनः स प्रयोगशालामेवागच्छत्।

५. मार्कट्वेन एकः प्रसिद्धः साहित्यकारः। स स्वस्य रचनासु भाषायाश्चिह्नानि नियमेन कदापि न लिखति स्म। एकदा तेन एको लेखः कस्मैचन सम्पादकमहोदयाय प्रकाशनार्थं प्रेषितः। तस्य लेखं दृष्ट्वा सम्पादकः किंकर्तव्यविमूढो जातः। तस्मिन् लेखे नासन् कान्यपि चिह्नानि प्रयुक्तानि। सम्पादकश्च तं लेखं मार्कट्वेनमहोदयाय चिह्नानि प्रयोक्तुं प्रेषयामास। तत् दृष्ट्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्कट्वेनोऽनेकानि चिह्नानि एकस्मिन् श्वेते पत्रे विलिख्य सलेखं पत्रमेकं सम्पादकाय पुनः प्रेषयामास । तस्मिन् पत्रे मार्कट्वेनेन लिखितमासीत्– "मया भवतानुरोधेन सकलानि चिह्नानि विलिख्य प्रेषितानि सन्ति । किं चिह्नं कुत्रावश्यकं भवति, भवान् स्वनिर्णयेन प्रयोक्तुं शक्नोति । अवशिष्टानि यानि चिह्नानि भविष्यन्ति, कृपया तानि सर्वाण्यपि पश्चाद् भवान् मह्यमेव प्रेषयतु" इति ।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।

यद् यत् परवशं कर्म तत् तद् यत्नेन वर्जयेत् ।
यद् यदात्मवशं तु स्यात् तत् तत् सेवेत यत्नतः ।।

– मनुस्मृतिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैदिकविद्याधर्मरक्षायां शङ्कराचार्यादीनां सन्न्यासिनां कीदृशी भूमिका उचिता

– प्रियव्रदाम्बा कौण्डिन्न्यायनी

शङ्करभगवत्पादेन उपनिषद्–ब्रह्ममीमांसासूत्र–गीतादिग्रन्थानां व्याख्यां विधाय वर्णाश्रमधर्मविरोधिनां वेदविरोधिनां वा दर्शनस्य खण्डनञ्च कृत्वा वैदिकदर्शनस्य वर्णाश्रमधर्मस्य च रक्षायां महत् कार्यं कृतमिति वैदिकसनातनवर्णाश्रमधर्मानुयायिषु प्रसिद्धमस्ति। उपनिषद्–ब्रह्ममीमांसासूत्र–गीतादिग्रन्थानां व्याख्याया अवलोकनेऽयं शङ्कराचार्यः परमवैदिकः विलोक्यते इति तद्विज्ञा वदन्ति। केचन शङ्करभगवत्पादं श्रीविद्यायाः उपासकं तान्त्रिकपरम्पराविशेषस्य प्रवर्तकं च कथयन्ति। अपरे 'शङ्करः परमवैदिक एवास्ति, तथापि स लौकिकलाभप्राप्त्यर्थं स्वसमीपमागतान् जनान् सुकरमुपायमुपन्ता देष्टुं तन्त्रस्यावश्यकमध्ययनं कृतवानासीत्, एवं च उक्तविधान् जनान् तन्त्रोक्तश्वेष्टसिद्ध्युपायान् उपदिशति स्म, तन्त्रमार्गे भगवत्पादः विशेषेण निष्ठावान् तु नैवाऽसीत्' इति वदन्ति। वैदिकविद्याधर्म रक्षायै शङ्करभगवत्पादेन भारतवर्षस्य चतुर्षु कोणेषु चत्वारः मठाः स्थापिताः इति च प्रसिद्धिरस्ति। अधुनाऽपि तेषां मठानाम् अविच्छिन्ना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परम्परास्तीति कथ्यते। तथापि केषाञ्चन मठानां परम्परा विच्छिन्ना भूत्वा पुनः प्रचलिता इतीतिहासाद् ज्ञायते। अधुनाऽपि द्वारका-शृङ्गेरि-पुरी-बदरिकाश्रमेषु प्रधानाः चत्वारः शाङ्करमठाः ततोऽन्येऽपि केचन विशिष्टाः वा साधारणाः वा शाङ्करमठाः सन्ति। तेषां मठानां मठाधीशाः "शङ्कराचार्याः" इति कथ्यन्ते। ते आत्मानं वर्णाश्रमधर्मस्य रक्षकं प्रचारकं धर्माचार्यं च मन्यन्ते। तदनुसारमेव वदन्ति, किञ्चित् कर्म कुर्वन्ति च। ते मठानां व्यवस्थायाः आधारस्य विषये शङ्कर-भगवत्पादकृतिरूपेण "मठाम्नायस्तोत्रम्" इति "मठाम्नायसेतुः" इति "महानुशासनम्" इति च लघून् ग्रन्थान् निर्दिशन्ति। एतेषु ग्रन्थेषु उक्ता विषयाः प्रायः समीचीना एव वर्तन्ते, तथापि तेषां शास्त्रसम्मतत्त्वं विचारणीयं दृश्यते इति मनीषिणामालोचनमस्ति। एतेषां मठानां मठाधीशा आत्मानं 'परमहंस-परिव्राजकाचार्यम्' कथयन्ति, अर्थात् ते आत्मानं वैदिकमार्गस्य उत्तमं सन्यासिनं मन्यन्ते, किन्तु मठाम्नायस्तोत्रादिषु वर्णितानि शाङ्करमठाधीशानां कर्माणि सन्यासिनां कृते समुचितानि शास्त्रसम्मतानि च न दृश्यन्ते; तानि कर्माणि बृहदारण्यकोपनिषदा प्रतिपादितानां परिव्राजकलक्षणानां जाबालोपनिषदा कथितानां परमहंसलक्षणानां वाऽनुकूलानि न सन्ति इति विद्वांसः कथयन्ति। एतस्मिन् विषये विचारणीयमस्ति यत् आद्यशङ्कराचार्येण कृता व्यवस्थाऽपि मन्त्रब्राह्मणश्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-स्मृति-पुराणादिविरुद्धा चेत् सा वैदिकसनातनवर्णाश्रमधर्मानुयायिनां कृते मान्या भवितुं नार्हति। शाङ्करभगवत्पादकृता व्यवस्था मन्त्रब्राह्मणाद्यविरुद्धसामान्यलौकिकव्यवस्थारूपेण ग्रहीतुं योग्यतया व्याख्यातुं व्यवहर्तुं च शक्येत तर्हि सा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवस्था आदरणीया भवितुं शक्नोति । स्यादेतेनैव कारणेन मठाम्नायसेतोर्व्यवस्थायां शास्त्रसम्मतेः प्रदर्शनस्य प्रसङ्गे गौतमधर्मसूत्रस्य "तानाचार्योपदेशो दण्डश्च पालयते तस्माद् राजाचार्यावनिन्द्यौ" इति उल्लेखः मठाम्नायसेत्त्वादिषु प्राप्यते । तत्र मनोः गौतमस्य च वचनस्याऽऽधारः गृहीत इव विलोक्यते । किन्तु मनुस्मृत्यां गौतमधर्मसूत्रे च उल्लिखित आचार्यः सन्न्यासी नास्ति, अतः तस्या व्यवस्थायाः मनुस्मृतिसम्मतत्त्वं गौतमधर्मसूत्रसम्मतत्त्वं वा चिन्त्यमेव दृश्यते इति विवेचका वदन्ति । अत एव मठाम्नायस्य व्यवस्थायाः शाङ्करमठपरम्परायाश्च वेदादिशास्त्रसम्मतत्त्वमस्ति न वेति वैदिकविद्वद्भिः वर्तमानैः शाङ्करमठाधीश–"शङ्कराचार्यै"श्च सम्यग् विचारणीयं दृश्यते । यदि तस्या व्यवस्थायाः शास्त्रसम्मतत्त्वं नास्ति तर्हि अशास्त्रीयव्यवस्थातः वैदिकसनातनवर्णाश्रमधर्मस्य रक्षा न भवतीति तत्र संशोधनं पुनर्व्यवस्थापनं च कर्तुं तैः प्रयतितव्यम् । किन्तु शाङ्करमठानां वर्तमानाः मठाधीशाः 'शङ्कराचार्याः' एतादृशाद् विचाराद् दूरे स्थिताः सन्तो महानुशासनस्य "केवलं धर्ममुद्दिश्य विभवो बाह्यचेतसाम् । विहितश्चोपकाराय पद्मपत्रनयं व्रजेत्" इत्यादिकमनुशासनं विस्मृत्य केवलं दम्भोक्तिरूपासु विरुदावलिषु दाम्भिकेषु व्यवहारेषु च आसक्ताः, पण्डितैः विद्वद्भिः सह सङ्गतिं शास्त्रधर्मदर्शनचर्चादिकं च त्यक्त्वा महाधनिकैः अविवेकिभिर्भक्तैः सह सङ्गतौ लोकव्यवहारस्य चर्चायां चाधिकं ध्यानं ददते । तथैव धर्मवृद्धये शास्त्रीयां चेष्टां त्यक्त्वा स्वमठस्य लौकिक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्मानस्य प्रचारस्य च वृद्धये ध्यानं ददते। अपि च ते वेदाध्ययनाध्यापनपरम्परायाः रक्षायाः अपेक्षया मन्दिरनिर्माण–मूर्तिपूजनादिपरम्परायाः रक्षायां विशेषतो दत्तावधाना दृष्टिगोचरीभवन्ति। भारतवर्षस्य अन्धकारयुगस्य सामन्तानां दम्भस्य स्मारकतया अचार्यपीठाभिषेकादिकं स्फटाटोपं च कर्तुं प्रवृत्ताः दृश्यन्ते। एतादृशीभिः प्रवृत्तिभिः वैदिकपरम्परायाः संरक्षणं वैदिकधर्मस्य अभिवृद्धिश्च भवितुं नैव शक्नोतीति विज्ञायते। अतः एतादृशीषु प्रवृत्तिषु संशोधनाय मनीषिभिः प्रयतितव्यं प्रतीयते। आधुनिकशङ्कराचार्याणां प्रवृत्तयः इवैव महामण्डलेश्वराणाम् अरविन्दाश्रमादिसम्बद्धानां स्वामिनां च प्रवृत्तयो दृश्यन्ते। कतिपये "महामण्डलेश्वराः" "स्वामिनः" च धनिनां बलिनां चोपकरणरूपाः, तेषामेव मनोविनोदस्य साधनत्त्वं प्राप्ताः, तेषामेव स्तुतिपाठकभूताश्च दृश्यन्ते श्रूयन्ते च। एतादृशेषु विषयेषु अपि विवेकशीलैः वैदिकसनातनवर्णाश्रमधर्मानुयायिभिर् मनीषिभिरवधानं देयम्। वैदिकविद्याधर्मसंरक्षणाय सन्यासिनां केनापि प्रकारेण शास्त्रसम्मत उपयोगो भवितुमर्हति न वेति च तैर्विवेक्तव्यं तदनुसारं व्यवहर्तव्यं च दृश्यते। यदि मनीषिभिरपि विना विवेचनं गतानुगतिकैरेव भूयते तर्हि लोके विवेकिकिरणाः कुत आगच्छेयुः, कुतो वा लोकस्य मोहान्धकारो नश्येत्!! □

मूढः परप्रत्ययनेयबुद्धिः।

– कालिदासः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुल्बसूत्रे उल्लिखितं साध्यं किं पाइथागोरसस्य ?

– ज्ञानमणिः नेपालः

प्राचीनसमयादर्वाचीनसमयपर्यन्तं संस्कृतभाषाया विकासो नैरन्तर्येण दृश्यते । प्राचीनकालेऽस्या अतीव विकासोऽभूत् । संस्कृत-भाषायाः प्राचीनग्रन्थः वेदोऽस्ति । वेदपुरुषस्य षडङ्गानां मध्ये ज्यौतिष-शास्त्रमेकम् । तत् संहिता, फलितम्, सिद्धान्त इति त्रिभिः खण्डैः विभज्यते । सिद्धान्तज्यौतिषपठनाय रेखागणितस्य ज्ञानमत्यावश्यकं वर्तते । अतोऽस्माकं पूर्वजा रेखागणितशास्त्रे समुन्नतिमकुर्वन् । ईशायाः ३००० वर्षपूर्वं बौधायन–आपस्तम्बनामाख्यपण्डिताभ्यां विरचितशुल्वसूत्रे भुजकोट्योर्वर्गयोगसमः कर्णस्य वर्गो भवतीति सिद्धम् ।

दीर्घचतुरस्रस्यान्कया रज्जुः पार्श्वमानी तिर्यङ्मानी च यत् पृथग्भूते कुरुतस्तदुभयं करोति ।

– बौधायन शु. सू. १।३७

दीर्घस्याऽक्ष्णया रज्जुः पार्श्वमानी तिर्यङ्मानी च यत् पृथग्भूते कुरुतस्तदुभयं करोति ।

आपस्तम्ब शु. सु. १।४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परन्तु पाश्चत्येतिहासकारा इयं प्रतिज्ञा पाइथागोरसमहोदयेन अनुसन्धानीकृतेति वक्तुमिच्छन्ति । 'यूरोप' देशेषु रेखागणितस्य व्यवस्थितं पुस्तकं "यूक्लिड" महोदयस्य दृश्यते । यूक्लिडस्य जीवन-कालं ईशायाः ३०० वर्षपूर्वं मन्यते । अतः पाइथागोरसमहोदयेन भारतवर्षे आगत्य एनां प्रतिज्ञां स्वकीयभाषायां केवलमनुवादं कृत्वा स्वदेशे प्रचारयामास इति वक्तुं शक्यतेऽस्माभिः ।

कालान्तरे यदा भारतवर्षे आङ्लभाषाया अनुयायिनः शासनभारं स्वहस्ते गृहीत्वा आङ्लभाषायाः संस्कृतेश्च प्रचारम-कार्षुस्तदा भयवशाद् भारतीयैः साधारणजनैः एतत् स्वीकृतम् परन्तु न विद्वज्जनैः ।

× × × ×

जीवन्तोऽपि मृताः पञ्च व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ।।

– सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञातव्यः विषयः

– जनार्दनः घिमिरे

(१) विश्वस्मिन् सुपरिचितो महान् चित्रकारः लियो नार्दो दा भिञ्चि-महोदय एकस्मिन्नेव समये एकेन हस्तेन लिखति स्म, अपर-हस्तेन रेखाचित्रमपि चित्रयति स्म ।

(२) 'कोपनहेगना'– ख्यविश्वविद्यालयस्य प्राध्यापकः 'रास्क'– महोदयः पञ्चत्रिंशदधिकद्विशतं भाषा धाराप्रवाहरूपेण वक्तुं शक्नोति स्म । स विभिन्नासु भाषासु अष्टाविंशतेः शब्दकोषाणां रचनामकार्षीत् ।

(३)) यदा वैज्ञानिकः 'विल्हेम कोनरेड' महाभागः स्वप्रयोगशा-लायां सूर्यकिरणान्तर्गतस्य 'परावैजनी' इति नामकस्य किर-णस्याऽवलोकनं कुर्वन्नासीत्, तदैव तेनाऽप्यपरिचितस्य क्षकिरणस्य ('एक्सरे' इत्यस्य) उत्पत्तिरभूत् ।

(४) मृतापेक्षया जीविते मनुष्ये एकविंशतिग्रामस्य भारस्य अधिक-त्वाद् आत्मनः (जीवात्मनः) भार एकविंशतिग्राम एव भवतीति केचिद् वैज्ञानिकाः कथयन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(५) 'उत्तरी साइबेरिया' इत्यस्मिन् देशे एकं विचित्रं प्रचलनमस्ति। तत्र या कापि नारी कस्याऽपि पुरुषस्य शिरसि यदि स्वेदजं (यूकम्) क्षिपति, तदा तत्कर्मणोऽयमर्थो भवति यत् सा तेन पुरुषेण सह प्रेम कर्तुं वाञ्छतीति।

(६) जर्मनदेशस्य सम्राजः 'चार्ल्स (चतुर्थ)' महोदयस्य चतुःसङ्ख्यया सहाऽतीव प्रेम आसीत्। स प्रतिदिनं चतुर्वारं भोजनं कुरुते स्म। तस्य भोजनानि अपि चतुर्विधानि भवन्ति स्म। स चतुर्विधानि मद्यानि पिबति स्म। तस्य प्रासादस्य प्रकोष्ठाः चतुर्विधवस्तुभिः सज्जिताः भवन्ति स्म। स चतुर्भिः रङ्गैः रञ्जितानि पृथक् पृथग् वस्त्राणि परिधत्ते स्म। तस्य सैन्यमपि चतुर्विधमेवाऽऽसीत्। तस्य राज्यमपि चतुर्षु भागेषु विभक्तमासीत्। यदा स मृत्युशय्यायामासीत्, तदा चत्वार एव चिकित्सकाः तस्योपचारे संलग्ना आसन्। अन्ते स सम्राट् ४:०४ वादनसमये एव पञ्चत्वं गतश्च।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छात्रसङ्घकार्यकलापः

२०४५ वैशाखमासे सम्पन्ने निर्वाचने अत्यधिकमतेन निर्वाचिते सति अयं छात्रसङ्घः छात्राणां विभिन्नाः समस्याः समाधातुं प्रयत्नशीलः अस्ति । तथैव छात्राणां प्रतिभायाः समुन्नत्यर्थमनेन छात्रसङ्घेन विविधाः कार्यक्रमाः सञ्चालिताः । वैशाखमासे एव संस्कृतभाषायां "विश्वशान्तये संस्कृत–शिक्षायाः उपादेयता" इत्यस्मिन् विषये निबन्धलेखनप्रतियोगिता सञ्चालिता । ध्रुवः भट्टराई, जनार्दनः उपाध्यायः, जीवनः अधिकारी, जनार्दनः घिमिरे इत्येते महोदयाः अत्र विजयिनः अभूवन् । तथैव भाद्रमासे एका कविगोष्ठी समायोजिता । अस्यां विनोदः अधिकारी, नवराजः लंसालः, जनार्दनः उपाध्यायः, शालिग्रामः वस्ताकोटी इत्येते महोदयाः पुरस्कृताः अभूवन् । छात्रसङ्घेन आश्विनमासे वक्तृत्वकलायाः प्रतियोगिता प्रायोजिता । कार्यक्रमेऽस्मिन् नवराजः लंसालः, मनोजकुमारः आचार्यः, प्रकाशः भण्डारी, माधवः लामिछाने, कुमारी प्रियंवदाम्बा कौण्डिन्न्यायनी इत्येते महोदयाः विजयं प्रापन् । मार्गशीर्षमासे "प्रत्यक्ष–प्रश्नोत्तरप्रतियोगिता" आयोजिता । अस्यां प्रतियोगितायां मनोजकुमाराचार्यमहोदयस्य समूहः, जनकभट्टमहोदयस्य समूहः, आमोदवर्धन–कौण्डिन्न्यायनमहोदयस्य समूहश्च विजयम् प्रापुः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्गशीर्षे मासे एव विद्यापीठेऽस्मिन् अध्येतुम् आगतानां सम्पूर्णच्छात्राणां कृते स्वागतसमारोह–कार्यक्रमः आयोजितः। अस्मिन्नवसरे नवागतानां छात्राणां परिचयात्मक–कार्यक्रमः, तथा सांस्कृतिक–कार्यक्रमश्च सञ्चालितः। आगामिषु दिनेषु अपि अनेनैव प्रकारेण छात्रसङ्घः कार्यक्रमान् सञ्चालयितुम् अत्राध्ययनरतानां सुहृदां सहयोगमपेक्षते।

पूर्णचन्द्रः वाग्ले
सचिवः, छात्रसङ्घः,
वाल्मीकि– विद्यापीठम्

सूचना

एषा पत्रिका अस्माभिः प्रथमवारं प्रकाशिता अस्ति। अतः अस्यां बहव्यः त्रुटयः भवेयुः। एतासां त्रुटीनां निराकरणाय पाठक-महोदयानां परामर्शं कामयते अयं छात्रसङ्घः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादकीयम्

शिशु-प्रयासः

संस्कृतभाषाऽमरभाषा । एषा भाषा प्राचीनतमा, ज्येष्ठा, प्रेष्ठा, वन्दनीया च । विश्वस्यैकमात्रहिन्द्वधिराज्यत्वेन पाशुपतक्षेत्रत्वेन च विश्वसम्मान्येऽस्माकं नेपालाधिराज्येऽपि वर्तमाने युगे भौतिकवादस्य विकासेनास्याः भाषायाः पतनोन्मुखी दुरवस्था दृश्यते चेत् का कथाऽन्यदेशेषु । अस्मिन् युगे जनाः संस्कृतभाषायाः महत्त्वमपि ज्ञातुं नैव समर्थाः सन्ति । पाश्चात्य–समाजस्यान्धानुकरणेनास्माकं प्राचीनाः परम्परा विनाशशीला दृश्यन्ते । संविधाने नेपालाधिराज्यस्य हिन्द्वधिराज्यत्वं प्रतिपादितम्, परं हिन्दुधर्मस्य आधारशिलास्वरूपायाः संस्कृतभाषायाः प्रचारे प्रसारे च सर्वकारेण समुचितः प्रयत्नो नैव कृतः । राष्ट्रे संस्कृत–विश्वविद्यालयस्य स्थापनया सर्वे जनाः विशेषतः संस्कृतप्रेमिण आशावादिन आसन्, परं तस्य कार्यप्रणालीम्, सर्वकारस्योदासीनताम्, अन्याः परिस्थितीश्च दृष्ट्वा सर्वे जना हतोत्साहा इव दृश्यन्ते । छात्रा वयं संस्कृतभाषायाः प्रचारे प्रसारे च विशेषत उल्लेख्यं किमपि कर्तुं नैव शक्नुमः । तथापि विशेषेण छात्राणामुत्तरदायित्वेन यथाशक्ति यथाज्ञानमस्या भाषायाः प्रचारे प्रसारे च समुचितः सामयिकः प्रयासः कर्त्तव्य इति स्वल्पबुद्ध्या विचार्य एष प्रयत्नः प्रस्तुतीकृतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतभाषा प्रमुखरूपेण द्विविधा वर्तते– वैदिकी, लौकिकी च । वैदिक्या भाषाया ज्ञानार्थं लौकिक्या भाषायाः ज्ञानं परमावश्यकं भवति । प्रौढायाः लौकिक्याः संस्कृतभाषायाः ज्ञानात्पूर्वं सरलायाः व्यावहारिक्याः संस्कृतभाषायाः ज्ञानं परमोपयोगि भवति ।

संस्कृतभाषायाः प्रचारे प्रसारे च क्लिष्टानां दुर्बोधानां च शब्दानां प्रयोगः अवरोधक एव केवलम् । गहनतम–शास्त्रीय–विषयादि-चिन्तने प्रौढ–शब्द–ज्ञानस्यावश्यकता भवतीति मन्यन्ते विद्वद्वरेण्याः । सरलसंस्कृतभाषायाः प्रयोगे सुगमत्वेन जनानां संस्कृतभाषायाः पठने लेखने च प्रवृत्तिः भवेदिति विचार्य अस्माभिरेष शिशुप्रयासः कृतः । तेन हि सरलसंस्कृतभाषायाः प्रयोगेण सरलसंस्कृतस्य प्रचार एव अस्याः पत्रिकायाः मुख्यमुद्देश्यम् वर्तते ।

वाल्मीकि–विद्द्यापीठ–छात्र–सङ्घेन संस्कृतस्याध्ययनार्थं वाल्मीकि–विद्यापीठे समागतेभ्यश्छात्रेभ्यो बौद्धिके विकासे व्यायामे च सहायतां प्रदातुं समये समये विविधाः कार्यक्रमाः समायोजिताः सन्ति । तेषु च कार्यक्रमेषु पत्रिकाप्रकाशनप्रयासोऽप्यन्यतमः । एतेन प्रयासेन छात्रबन्धवः संस्कृतभाषायां वक्तुं लेखितुञ्च समर्था भवेयुरित्याशास्महे, अथ च छात्रसमूहतः संस्कृतभाषायाः पत्रिकाप्रकाशनमस्माकं राष्ट्रे सामयिकं कार्यमिति च मन्यामहे ।

एतस्याः पत्रिकायाः त्रैमासिकरूपेण प्रकाशनेऽस्माकं सुदृढेच्छा वर्तते । अर्थाभावेनाऽसमर्था अपि "यत्रेच्छा तत्र तत्प्राप्तेरुपायः" इति वचनानुगमनेन सदैव प्रयत्नशीलाः स्मः । अस्याः प्रकाशनायार्थिक-सहयोगदानेन प्रोत्साहकः महेन्द्र–संस्कृत–विश्वविद्यालयः, लेखरचना-सद्बुद्धियुक्तिदायिनः सहयोगिनश्च भूयोभूयोऽधिकं स्वकीयौदार्यं प्रदर्शयिष्यन्तीति वयं विश्वसिमः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुरोधः

आगामिनि अङ्के समस्यापूर्तेः अपि प्रकाशनं भविष्यति । "का संस्कृता संस्कृतिः" इति पद्यपादं आदाय द्विन्नाणि पद्यानि प्रेषयन्तु ।

卐

पञ्चश्रीकवीरेन्द्रवीरविक्रमशाहदेवानां

चतुश्चत्वारिंशत्तमे

शुभजन्मोत्सवोपलक्ष्ये

तत्र भवतां सुस्वास्थ्यं दीर्घशासनं

च कामये ।

अधिवक्ता

बाबुराजा जोशी

कृष्णमञ्जरी आश्रमः

मुद्रकः— बागबजार छापाखाना इच्छुमती टोल, फोन २–२२१७४

Jayatu Sanskritam, Kathmandu, Nepal